## पूर्वाधरावराणामसि पुरधवश्चैषाम् । (३९/१०७८)

अपञ्चम्याः इति निवृत्तम् । तिसृणां[1] विभक्तीनामिह ग्रहणम् । पूर्वाधरावराणाम् असिः प्रत्ययो भवति अस्तातेरर्थे । तत्संनियोगेन चैषां यथासङ्ख्यं पुर् अध् अव् इत्येते आदेशा भवन्ति । [2]असि इत्यविभक्तिको निर्देशः । पुरो वसति । पुर आगतः । पुरो रमणीयम् । अधो वसति । अध आगतः । अधो रमणीयम् । अवो वसति । अव आगतः । अवो रमणीयम् ॥

## अस्ताति च । (४०/१०७६)

[3]सप्तम्यन्तमेतत् । [4]अस्तातिप्रत्यये परतः पूर्वादीनां[5] यथासङ्ख्यं पुरादय आदेशा भवन्ति । इदमेवा[6]देश-विधानं ज्ञापकम्, अस्तातिरेभ्यो भवति, असिप्रत्ययेन न बाध्यते इति । पुरस्ताद् वसति । पुरस्तादागतः । पुरस्ताद् रमणीयम् । अधस्ताद् वसति । अधस्तादागतः । अधस्ताद् रमणीयम्[7] ॥

## विभाषाऽवरस्य । (४१/१०७७)

पूर्वेण [8]नित्ये प्राप्ते विकल्प उच्यते । अवरस्यास्तातौ[9] परतो विभाषा अव् इत्ययमादेशो भवति । अवस्ताद् वसति । अवस्तादागतः । अवस्ताद् रमणीयम् । अवरस्ताद् वसति । अवरस्तादागतः । अवरस्ताद् रमणीयम् ॥

## सङ्ख्याया विधार्थे धा । (४२/१०८८)

सङ्ख्यावाचिभ्यः प्रातिपदिकेभ्यो विधार्थे वर्तमानेभ्यो धा प्रत्ययो भवति स्वार्थे । विधा प्रकारः, [10]स च सर्वक्रियाविषय [11]एव गृह्यते । [12]क्रियाप्रकारे वर्तमानायाः सङ्ख्याया [13]धा प्रत्ययः[14] । एकधा भुङ्क्ते[15] । द्विधा गच्छति । त्रिधा[16] । चतुर्धा । पञ्चधा ॥

## अधिकरणविचाले च । (४३/१०८९)

सङ्ख्यायाः इत्येव । अधिकरणं द्रव्यं, तस्य विचालः सङ्ख्यान्तरापादनम् । एकस्यानेकीकरणमनेकस्य वा एकीकरणम् । अधिकरणविचाले गम्यमाने सङ्ख्यायाः स्वार्थे धा प्रत्ययो भवति । एकं राशिं पञ्चधा कुरु । [17]अष्टधा कुरु । अनेकमेकधा कुरु ॥

## एकाद्धो ध्यमुञन्यतरस्याम् । (४४/१०९०)

एकशब्दात् परस्य धाप्रत्ययस्य ध्यमुञ् आदेशः भवत्यन्यतरस्याम् । एकधा राशिं कुरु, ऐकध्यं[18] कुरु (म. भा. २.४१०) । [19]एकधा भुङ्क्ते, ऐकध्यं भुङ्क्ते । [20]प्रकरणादेव लब्धे पुनर्धाग्रहणं विधार्थे[21] विहितस्यापि यथा स्यात् । अनन्तरस्यैव[22] ह्येतत् प्राप्नोति ॥

---

1. अपि इत्यधिकम् क. ह. 2. वाक्यमिदं नास्ति ब. ड. फ. ह. 3. वाक्यमिदं नास्ति ब. फ. 4. अस्तातौ प्रत्यये ड. 5. स्थाने इत्यधिकम् क, यथासङ्ख्यम् नास्ति ब. 6. आदेशवचनम् क. ह. 7. अवरस्तात् वसति, अवरस्तात् आगतः, अवरस्ताद् रमणीयम् इत्यधिकम् क. ड. फ. 8. नित्यः प्राप्तोऽवादेशो विकल्प्यते क. ग. 9. प्रत्यये इत्यधिकम् ह. 10. स च नास्ति ग. ह. 11. इह ब. क. ड. फ, इह परिगृह्यते ह. 12. क्रियायां क. 13. धा नास्ति फ. 14. इष्यते इत्यधिकम् क. 15. द्विधा भुङ्क्ते इत्यधिकम् क. ड. 16. गच्छति इत्यधिकम् क. 17 सप्तधा क. ड. ह. 18. राशिं इत्यधिकम् ड. 19. प्रकरणादेव विधार्थे इत्यधिकम् ड. 20. धा इत्यधिकम् ब. ड ग. 21. अपि विहितस्य क. ह. 22. हि. नास्ति क. ग, एतत् नास्ति क.